योगवासिष्ठः/प्रकरणम् ६ (निर्वाणप्रकरणस्य पूर्वार्धम्)/सर्गः ०२०

अज्ञातलेखकः

निर्वाणप्रकरणस्य पूर्वार्धम्

सर्गः १

सर्गः २

सर्गः ३

सर्गः ४

सर्गः ५

सर्गः ६

सर्गः ७

सर्गः ८

सर्गः ९

सर्गः १०

सर्गः ११

सर्गः १२

सर्गः १३

सर्गः १४

सर्गः १५

सर्गः १६

सर्गः १७

सर्गः १८

सर्गः १९

सर्गः २०

सर्गः २१

सर्गः २२

सर्गः २३

सर्गः २४

सर्गः २५

सर्गः ६५

सर्गः ६६

सर्गः ६७

सर्गः ६८

सर्गः ६९

सर्गः ७०

सर्गः ७१

सर्गः ७२

सर्गः ७३

सर्गः ७४

सर्गः ७५

सर्गः ७६

सर्गः ७७

सर्गः ७८

सर्गः ७९

सर्गः ८०

सर्गः ८१

सर्गः ८२

सर्गः ८३

सर्गः ८४

सर्गः ८५

सर्गः ८६

सर्गः ८७

सर्गः ८८

सर्गः ८९

सर्गः २६
सर्गः २७
सर्गः २८
सर्गः २९
सर्गः ३०
सर्गः ३१
सर्गः ३२
सर्गः ३३
सर्गः ३४
सर्गः ३५
सर्गः ३६
सर्गः ३७
सर्गः ३८
सर्गः ३९
सर्गः ४०
सर्गः ४१
सर्गः ४२
सर्गः ४३
सर्गः ४४
सर्गः ४५
सर्गः ४६
सर्गः ४७
सर्गः ४८
सर्गः ४९
सर्गः ५०
सर्गः ५१
सर्गः ९०
सर्गः ९१
सर्गः ९२
सर्गः ९३
सर्गः ९४
सर्गः ९५
सर्गः ९६
सर्गः ९७
सर्गः ९८
सर्गः ९९
सर्गः १००
सर्गः १०१
सर्गः १०२
सर्गः १०३
सर्गः १०४
सर्गः १०५
सर्गः १०६
सर्गः १०७
सर्गः १०८
सर्गः १०९
सर्गः ११०
सर्गः १११
सर्गः ११२
सर्गः ११३
सर्गः ११४
सर्गः ११५

सर्गः ५२ सर्गः ११६
सर्गः ५३ सर्गः ११७
सर्गः ५४ सर्गः ११८
सर्गः ५५ सर्गः ११९
सर्गः ५६ सर्गः १२०
सर्गः ५७ सर्गः १२१
सर्गः ५८ सर्गः १२२
सर्गः ५९ सर्गः १२३
सर्गः ६० सर्गः १२४
सर्गः ६१ सर्गः १२५
सर्गः ६२ सर्गः १२६
सर्गः ६३ सर्गः १२७
सर्गः ६४ सर्गः १२८

विंशः सर्गः २०

भुशुण्ड उवाच ।

आसीत्किंचित्पुरा कल्पे जगद्यच्चिरमास्थितम् ।

संनिवेशेन चैतद्वदद्यापि च न दूरगम् ।। १

तदेतद्वृत्तमभ्यासाद्वर्तमानेन वर्णितम् ।

मया मुनीन्द्र बोधाय प्राग्जन्मसाम्यदर्शिना ।। २

अद्य मे फलितं पुण्यैश्चिरकालोपसंभृतैः ।

निर्विघ्नमेव पश्यामि यद्भवन्तं मुने ततः ।। ३

इदं नीडमिमां शाखामहं चायमयं द्रुमः ।

अद्य पावनतां प्राप्तान्येतानि तव दर्शनात् ।। ४

इदमर्घ्यमिद पाद्यं गृहीत्वा विहगार्पितम् ।

नूनं पावनतां नीत्वा शेषेणादिश चाशु भोः ।। ५

श्रीवसिष्ठ उवाच ।

इदमर्घ्यं च पाद्यं च भूयो दत्तवति स्वयम् ।

भुशुण्डविहगे तस्मिन्निदं रामाहमुक्तवान् ।। ६

भ्रातरस्ते विहङ्गेश तादृक्सत्त्वा महाधियः ।

इह कस्मान्न दृश्यन्ते त्वमेवैको हि दृश्यसे ।। ७

भुशुण्ड उवाच ।

तिष्ठतामिह नः कालो महानतिगतो मुने ।

युगानां पङ्क्तयः क्षीणा दिवसानामिवानघ ।। ८

एतावताथ कालेन सर्व एव ममानुजाः ।

तनूस्तृणमिव त्यक्त्वा शिवे परिणताः पदे ।। ९

दीर्घायुषो महान्तोऽपि सन्तोऽपि बलिनोऽपि च ।

सर्व एव निगीर्यन्ते कालेनाकलितात्मना ।। 6.1.20.१०

श्रीवसिष्ठ उवाच ।

स्कन्धव्यूढार्कशशिषु वहत्स्वविरतं जवात् ।

वातस्कन्धातिवातेषु कच्चित्तात न खिद्यसे ।। ११

दग्धोदयास्तशैलेन्द्रवनव्यूहै रवेः करैः ।

चिरमत्यन्तमासन्नैः कच्चित्तात न खिद्यसे ।। १२

इन्दोरथ करैः शीतैः पाषाणीकृतवारिभिः ।

आसन्नकरकापातैः कच्चित्तात न खिद्यसे ।। १३

अजस्रमिह विश्रान्तैः कल्पजीमूतमण्डलैः ।

परशुच्छेदनीहारैः कच्चित्तात न खिद्यसे ।। १४

विषमैर्जागतैः क्षोभैरुच्चैस्तरपदस्थितः ।

कथं न क्षोभमायाति कल्पवृक्षोऽयमुन्नतः ।। १५

भुशुण्ड उवाच ।

निरालम्बास्पदा ब्रह्मन्सर्वलोकावहेलिता ।
तुच्छेयं सर्वभूतानां मध्ये विहगजीविका ।। १६
ईदृशेषु च भूतेषु निर्जनेषु वनेषु च ।
कल्पितास्थास्थितिर्धात्रा शून्ये वा व्योमवर्त्मनि ।।१७
कथमस्यां प्रभो जातौ जातस्य चिरजीविनः ।
आशापाशनिबद्धस्य विहगस्य विशोकिता ।। १८
वयं तु भगवन्नित्यमात्मसंतोषमास्थिताः ।
न कदाचन नीरूपे मुह्यामो जातविभ्रमैः ।। १९
स्वभावमात्रसंतुष्टाः कष्टैर्मुक्ता विचेष्टितैः ।
क्षिपामः केवलं कालमस्मिन्ब्रह्मन्निजालये ।। 6.1.20.२०
न जीवितान्न मरणात्कर्मदेहस्य रोधनम् ।
यथा स्थितेन तिष्ठामस्तथैवास्तंगतेहिताः ।। २१
आलोकिता लोकदशा दृष्टा दृष्टान्तदृष्टयः ।
नूनं संत्यक्तमस्माकं मनसा चञ्चलं वपुः ।। २२
अनारतनिजालोके नित्यं चापरितापिनि ।
कल्पागस्योपरि सदा वेद्मि कालकलागतिम् ।। २३
रत्नगुच्छप्रकाशाख्ये ब्रह्मन्कल्पलतागृहे ।
प्राणापानप्रवाहेण वेद्मि कल्पमखण्डितम् ।। २४
अविज्ञातदिवारात्रौ ह्यस्मिन्नुच्चैः शिलोच्चये ।
जानामि निजया बुद्ध्या लोककालक्रमस्थितिम् ।।२५
सारासारपरिच्छेदि बोधाद्विश्रान्तिमागतम् ।
निरस्तचापलं शान्तं सुस्थिरं मे मुने मनः ।। २६
संसारव्यवहारोत्थैराशापाशैरसन्मयैः ।
उद्गारैरिव भूकाको न वैवश्यं व्रजाम्यहम् ।। २७
परोपशमधर्मिण्या वयमालोकशीतया ।
पश्यन्तो जागतीं मायां धिया धैर्यमुपागताः ।। २८

भीमास्वपि महाबुद्धे दशास्वचलबुद्धयः ।

विनिर्मलोपलाकाराः संप्राप्तासु यथाक्रमम् ।। २९

इयमारम्भसुभगा तरला जागती स्थितिः ।

भूयो भूयः परामृष्टा न च किंच न बाधते ।। 6.1.20.३०

सर्वाण्येव प्रयान्त्येव समायान्ति च वा न वा ।

भगवन्भूतजालानि भयमस्माकमत्र किम् ।। ३१

भूतजालतरङ्गिण्या विशन्त्याः कालसागरे ।

वयं संसारसरितस्तटस्था अप्यनादृताः ।। ३२

नोज्झामो न च गृह्णीमस्तिष्ठामो नेह च स्थिताः ।

मृदुपादा दृशा कूरा वयमस्मिन्द्रुमे स्थिताः ।। ३३

वीतशोकभयायासैस्त्वादृशैः पुरुषोत्तमैः ।

तुष्टैरनुगृहीताः स्मः संस्थिता विगतामयाः ।। ३४

ततस्ततश्च पर्यस्तं लुठितं न च वृत्तिषु ।

नापरामृष्टतत्त्वार्थमस्माकं भगवन्मनः ।। ३५

निर्विकारे गतक्षोभे चात्मन्युपशमं गते ।

चित्तरङ्गाः प्रबुद्धाः स्मः पर्वणीव महाब्धयः ।। ३६

भवदागमनाद्ब्रह्मन्निदानीं मुदिताशयाः ।

मन्दरोद्धूतसर्वाङ्गः क्षीरोदो येन तन्यते ।। ३७

नातः परतरं किंचिन्मन्ये कुशलमात्मनः ।

सन्तो यदनुगम्यन्ते संत्यक्तसकलैषणाः ।। ३८

आपातमात्ररम्येभ्यो भोगेभ्यः किमवाप्यते ।

सत्सङ्गचिन्तामणितः सर्वसारमवाप्यते ।। ३९

स्निग्धगम्भीरमसृणमधुरोदारधीरवाक् ।

त्रैलोक्यपद्मकोशेऽस्मिंस्त्वमेकः षट्पदायसे ।। 6.1.20.४०

अधिगतपरमात्मनोऽपि मन्ये भवदवलोकनशान्तदुष्कृतस्य ।

मम सफलमिहाद्य जन्म साधो सकलभयापहरो हि साधुसङ्गः ।। ४१

इत्यार्षे श्रीवासिष्ठमहारामायणे वा० दे० मो० निर्वाणप्रकरणे पू० भुशुण्डोपाख्याने भुशुण्डस्वरूपनिरूपणं नाम विंशः सर्गः ।। २० ।।